## हस्ते वर्तिग्रहोः। (३९/३३६०)

[1]करणे इत्येव। हस्ते इत्यर्थग्रहणम्। वर्तिः ण्यन्तः। हस्तवाचिनि करणे उपपदे वर्तयतेः[2] गृह्णातेश्च णमुल् प्रत्ययो भवति। हस्तेन वर्तयति, हस्तवर्तं वर्तयति। करवर्तम्[3]। [4]पाणिवर्तम्। ग्रहेः खल्वपि – हस्तेन गृह्णाति, हस्तग्राहं गृह्णाति। [5]करग्राहम्। पाणिग्राहम्[6]॥

## स्वे पुषः। (४०/३३६१)

[7]करणे इत्येव। स्वे इत्यर्थग्रहणम्। स्ववाचिनि करणे उपपदे पुषेर्धातोः णमुल् प्रत्ययो भवति। [8]आत्मीयज्ञातिधन[9]वचनः स्वशब्दः। स्वपोषं पुष्णाति। [10]आत्मपोषम्। गोपोषम्[11]। पितृपोषम्। मातृ–पोषम्[12]। धनपोषम्। रैपोषम्॥

## अधिकरणे बन्धः। (४१/३३६२)

अधिकरणवाचिनि उपपदे बध्नातेः धातोः णमुल् [13]प्रत्ययो भवति। चक्रबन्धं बध्नाति। कूटबन्धं बध्नाति[14]। मुष्टिबन्धं बध्नाति। चोरकबन्धं बध्नाति[15]। [16]चोरके बध्नाति इत्यर्थः॥

## सञ्ज्ञायाम्। (४२/३३६३)

सञ्ज्ञायां विषये बध्नातेः धातोः णमुल् [17]प्रत्ययो भवति। क्रौञ्चबन्धं बध्नाति। मयूरिकाबन्धं बध्नाति। मयूरिकाबन्धं[18]बद्धः। अट्टालिकाबन्धं [19]बद्धः। बन्धविशेषाणां नामधेयानि एतानि॥

## कर्त्रोर्जीवपुरुषयोर्नशिवहोः। (४३/३३६४)

[20]जीवपुरुषयोः कर्तृवाचिनोरुपपदयोः यथासङ्ख्यं नशिवहोः धात्वोः णमुल् प्रत्ययो भवति। जीवनाशं नश्यति। जीवो नश्यति इत्यर्थः। पुरुषवाहं वहति। पुरुषः प्रेष्यो भूत्वा वहति इत्यर्थः। कर्तरि इति किम्? जीवेन नष्टः। पुरुषेणोढः॥

## ऊर्ध्वे शुषिपूरोः। (४४/३३६५)

कर्तृग्रहणमनुवर्तते। ऊर्ध्वशब्दे कर्तृवाचिनि उपपदे [21]शुषिपुरोः धात्वोः णमुल् [22]प्रत्ययो भवति। ऊर्ध्व–शोषं शुष्यति। [23]ऊर्ध्वं शुष्यति इत्यर्थः। ऊर्ध्वपूरं पूर्यते। ऊर्ध्वं पूर्यते इत्यर्थः॥

---

1. वाक्यमिदं नास्ति फ. 2. ग्रहेश्च धातोः फ. ब. 3. वर्तयति इत्यधिकम् फ. 4. पाणिवर्तम् नास्ति ब, वर्तयति इत्यधिकम् फ. 5. करग्राहं नास्ति फ, करग्राहः पाणिग्राहः ह. 6. गृह्णाति इत्यधिकम् फ. 7. वाक्य-मिदं नास्ति फ. 8. आत्मा° अ. ब. ह. 9. °वाची ह. फ. 10. आत्मपोषम् नास्ति ब. फ. ह. 11. महिषी-पोषं पुष्णाति इत्यधिकम् फ. ह. ब, महिषीपोषम् इत्यधिकम् अ. 12. पुष्णाति इत्यधिकम् अ. ब. 13. प्रत्ययो नास्ति फ. 14. चरकबन्धम्। चरके बध्नाति इत्यर्थः इत्यधिकम् ब, गुप्तिबन्धम् इत्यधिकम् फ. 15. इत्ये-वमादयः इत्यधिकम् फ. 16. वाक्यमिदं नास्ति फ. 17. प्रत्ययो नास्ति फ. 18. बद्धः नास्ति ह. 19. चण्डा-लिकाबन्धम् इत्यधिकम् फ, बद्धः नास्ति ब. 20. जीवपुरुषशब्दयोः अ. फ. ह. 21. शुषिपूरोः नास्ति फ. 22. प्रत्ययो नास्ति फ. 23. ऊर्ध्वः ब.